International Journal of Sanskrit Research 2021; 7(4): 207-212

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(4): 207-212
© 2021 IJSR
www.anantaajournal.com
Received: 01-05-2021
Accepted: 03-06-2021

**डाँ. शशिभूषणमिश्रः**
एम्. ए., पिएच्.डि., डि.लिट्.)
राष्ट्रपतिपुरस्कृत: वरिष्ठसहायकाचार्य:
श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालय:
७/२ ए, पि. डब्ल्यु. डि. रोड् कोलकाता,
पश्चिम बंगाल, भारत

**Corresponding Author:**
**डाँ. शशिभूषणमिश्रः**
एम्. ए., पिएच्.डि., डि.लिट्.)
राष्ट्रपतिपुरस्कृत: वरिष्ठसहायकाचार्य:
श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालय:
७/२ ए, पि. डब्ल्यु. डि. रोड् कोलकाता,
पश्चिम बंगाल, भारत

# पाणिनीये अपाणिनीये च पञ्चाङ्गव्याकरणम्

**डाँ. शशिभूषणमिश्रः**

**१.१. उपक्रम:** संस्कृतव्याकरणपरम्परा सुविशाला वर्तते। अत्र विविधव्याकरणानि आसन्। अस्य व्याकरणस्य विविधाङ्गानां वर्णनं परम्परायां प्राप्यते। पाणिनीये अपाणिनीये च सूत्रपाठादिव्याकरणाङ्गानि पञ्चाङ्गरूपेण परम्परायां परिचितानि भवन्ति। अस्मिन् शोधप्रबन्धे विषयेऽस्मिन् संक्षेपेण आलोचयाम :।

**२.१. पञ्चाङ्गव्याकरणस्य स्वरूपम्:** वैयाकरणेष्वस्ति प्रथिति:- 'पञ्चाङ्गं व्याकरणम्' इति। तानि च पञ्चाङ्गानि 'सूत्रपाठ:' 'गणपाठ:' 'धातुपाठ:' 'उणादिपाठ:' 'लिङ्गानुशासनं' चेति। एतानि मिलित्वा साङ्गं व्याकरणं भवति। पञ्चानां ग्रन्थानां (पाठानां) समाहारत्वात् पञ्चग्रन्थी (पञ्चपाठी) व्याकरणमित्यप्युच्यते। पुन: केचन शिक्षां, केचन परिभाषापाठमपि पञ्चाङ्गव्याकरणमध्ये परिगणयन्ति। सन्दर्भेऽस्मिन् दाहाल: वदति - 'तत्र हि शब्दानुशासनं धातुपाठ: गणपाठ: लिङ्गानुशासनं शिक्षा च पञ्चाङ्गानि। केचिच्छिक्षास्थाने उणादिसूत्राणि गणयन्ति, अपरे तु तत्र परिभाषापाठसमावेशयन्ति। अस्त्यत्र प्राचीन: श्लोक: –

> अष्टकं गणपाठश्च धातुपाठस्तथैव च।
> लिङ्गानुशासनं शिक्षा पाणिनीया अमी क्रमात्। इति ।
> वयन्तु शब्दानुशासनेन सह तत्सम्बद्धान् धातुपाठ-गणपाठ-परिभाषापाठ-लिङ्गानुशासनानि गणयाम: पञ्चाङ्गत्वेन तेषामेव शब्दानुशासनेन सह प्रत्यक्षसम्बद्धात्।' (पृ., - १०२ - १०३)

किन्तु दाहालमहोदयस्य विचार: अन्यै: न स्वीक्रियते। अन्ये च पण्डिता: 'सूत्रपाठ:' 'गणपाठ:' 'धातुपाठ:' 'उणादिपाठ:' 'लिङ्गानुशासनं' च पञ्चाङ्गव्याकरणमध्ये परिगणयन्ति।

**२.२. पञ्चाङ्गव्याकरणस्य ऐतिह्यम्:** संस्कृतभाषायां केवलं वेदा एव षडङ्गेषु विभक्ता: दृश्यन्ते। परन्तु अन्यानि चोपलब्धानि शास्त्राणि प्रायेण पञ्चाङ्गेषु विभक्तानि। वैयाकरणनिकाये व्याकरणशास्त्रस्य कात्स्न्र्यद्योतनार्थं 'पञ्चाङ्गव्याकरण'शब्दो व्यवह्रियते। परन्तु 'पञ्चाङ्गव्याकरणम्' इति शब्दस्य मूलप्रयोगविषये किञ्चित् न ज्ञायते। काशिकायां पञ्चप्रकारकव्याकरणविषये काशिकावृत्तौ (पा., ४/२/६०) उल्लेख: प्राप्यते। यथा-"पञ्चव्याकरण:"। अत्र अयं शब्द: सम्प्रदायविषये अथवा अङ्गविषये प्रयुक्त:, अस्मिन् विषये न किञ्चिद् ज्ञायते तत्त्वत:। कारणं काशिकायामुल्लिखितानां व्याकरणानां विषये किञ्चित् नोपलभ्यते। पुन: मेरुतुङ्गाचार्यरचिते प्रबन्धचिन्तामणिग्रन्थे पञ्चाङ्गव्याकरणविषये वर्णना प्राप्यते, यथा - 'यदि श्रीसिद्धराज: सहायी भवति तदा कतिपयैरेव दिनै: पञ्चाङ्गमपि नूतनं व्याकरणं रचयाम:।', '......हेमचन्द्राचार्यै: श्रीसिद्धहेमाभिधानाभिधानं पञ्चाङ्गमपि व्याकरणं सपादलक्षग्रन्थप्रमाणं संवत्सरेण रचयाञ्चक्रे।' (प्रबन्धचिन्तामणि:, सर्ग: - ३, सिद्धराजप्रबन्ध:)। कालान्तरे 'पञ्चाङ्गव्याकरणम्' इति शब्दस्य प्रयोग: नानाचार्यै: कृत: दृश्यते।

**२.३. पञ्चाङ्गव्याकरणस्य समानार्थकशब्दः** 'पञ्चाङ्गव्याकरणम्' इति शब्दस्य अर्थे 'खिल'शब्दस्यापि, 'परिशिष्ट'-शब्दस्यापि प्रयोगः दृश्यते। अर्थात् शब्दानुशासनातिरिक्ताः हि तत्सम्बद्धग्रन्थाः 'खिल'शब्देन वा 'परिशिष्ट'शब्देनाप्यभिधीयन्ते। अयं खिलशब्दोऽनेकेष्वर्थेषु प्रयुज्यते। शतपथब्राह्मणे, शाङ्खायनब्राह्मणे, सायणाचार्यप्रणीतशतपथब्राह्मणव्याख्याने च खिलशब्दः अकृष्टक्षेत्ररूपेण व्यवहृतः दृश्यते। पुनः गोपथब्राह्मणे, मनुस्मृतिप्रभृतिग्रन्थेषु च परिशिष्टभागार्थे अयं खिलशब्दः प्रयुज्यते। वैदिकवाङ्मये खिलशब्दः स्वशाखाऽनधीतस्वशास्त्रीयकर्मोपयोगि- परशाखीयमन्त्रसंग्रहेऽर्थे प्रयुक्तः दृश्यते। पुनः अयं खिलशब्दोऽवयवेऽर्थेऽपि प्रयुज्यते। कात्स्न्यार्थवाचिनि नञ्-समासघटिते 'अखिल'शब्दे 'खिल'शब्दोऽवयववाचक एव। यथा - नास्ति खिलं शून्यं यस्मिस्तत् अखिलम्। परन्तु अत्र व्याकरणे अङ्गवाचकार्थे अयं शब्दः प्रयुक्तः दृश्यते। पुनः अत्र खिलं नाम परिशिष्टमेव। पञ्चस्वङ्गेषु शब्दानुशासनमेव मुख्यं तथा अन्यानि चाङ्गानि शब्दानुशासनोपकारकत्वाद् गौणानि इति परम्परायां विद्यते। अत एव धातुपाठादीन्यङ्गानि शब्दानुशासनस्य 'खिल'संज्ञया व्यवह्रियन्ते। अतः पञ्चाङ्गयुक्तस्य शब्दानु-शासनस्य महत्त्वं सर्वातिशायि वर्तते। तत्र - 'अथ शब्दानुशासनम्' इति वचनस्य आदौ उपलम्भात् गणपाठादिपादचतुष्टयं शब्दानुशासनस्य खिलत्वेन परिशिष्टत्वेन वा पण्डितैः स्मर्यते। यथा - 'उपदिश्यतेऽनेनेत्युपदेशः शास्त्रवाक्यानि, सूत्रपाठः, खिलपाठश्च।' (काशिका, १/३/२)।

**२.४. विविधव्याकरणे पञ्चाङ्गव्याकरणस्य स्वरूपम्:** पाणिनीये अपाणिनीये च व्याकरणे पञ्चाङ्गयुक्तस्य शब्दानुशासनस्य अस्तित्वं दृश्यते। तेषु कतिपय अपाणिनीयव्याकरणे विद्यमानपञ्चाङ्गव्याकरणविषये समासेन आलोचयामः।

**२.४.१. कातन्त्रसम्प्रदायः** संस्कृतव्याकरणशास्त्रे पाणिनितोऽर्वाचीनानाम् उपलब्धव्याकरणानां मध्ये शर्ववर्मणः कातन्त्रव्याकरणं सर्वतः प्राचीनं महत्वपूर्णं महोपकारिसाधनत्वेन पूर्णस्थानञ्चालंकरोति। कातन्त्रवृत्तिकारः दुर्गसिंह कातन्त्रं 'लघुतन्त्रम्' इति व्याख्याति। ईषत् तन्त्रं कातन्त्रम्, ईषदर्थे 'कु'शब्दस्य "का त्वीषदर्थेऽक्षे" (का० २/५/२५) इत्यनेन कादेशः। अस्य कलापः, कलापकं, कालापः, कौमारं (प्राचीनकाले कुमाराणां नाम बालकानां व्याकरणशास्त्रसामान्यबोधाय शास्त्रमिदमध्याप्यते स्म। अत एवाऽस्य नाम 'कुमाराणामिदं कौमारम्' इति व्युत्पत्या 'कौमारम्' इति संवृत्तम्। केचन कुमारात् नाम कार्त्तिकेयादागतं कौमारमिति वदन्ति।), कालापकञ्चेति अपरनामानि प्राप्यन्ते। पाणिनीयव्याकरणापेक्ष्यया लघुत्वात् व्याकरणमिदं कातन्त्रव्याकरणं भवति। ऐन्द्रव्याकरणस्य एकमात्रनिर्वाहकत्वेनास्य व्याकरणस्य ख्यातिः विद्यते। कातन्त्रव्याकरणं केवलं लौकिकशब्दसाधकं पाणिनितो लघुकलेवरञ्च। कातन्त्रव्याकरणस्य वैशिष्ट्यवर्धनाय अस्य बहवः व्याख्यानग्रन्थाः कालान्तरे रचिताः। अस्य वैशिष्ट्यं लोकप्रियतां च दृष्ट्वा तथा तत्रस्थितां न्यूनतां परिपूरयितुं विविधपण्डितैः इह परिशिष्टानि योजितानि। पुनः कातन्त्रव्याकरणस्य वार्त्तिखग्रन्थाः अपि विद्यन्ते। तस्य वार्त्तिककारेष्वपि शर्ववर्माचार्यः, वररुचिः कात्यायनः, दुर्गसिंहः, चिच्छुमः, उमापतिः, जिनप्रभसूरिः, जगद्धरभट्टादयः च विद्यन्ते। कातन्त्रसम्प्रदायस्य शर्ववर्मप्रोक्तो धातुपाठोऽपि विद्यते। सच वृद्धलघुभेदेन द्विधा। एवमेव शर्ववर्मणो उणादिपाठः तथा गणपाठोऽपि विद्यते। कातन्त्रव्याकरणस्योपरि 'कलापप्रिया' नाम प्रक्रियाग्रन्थो बलदेवेन रचितः।

सप्तदशशतके कातन्त्रव्याकरणस्य व्यवहारः प्रचारश्च काश्मीरप्रदेशे अभवत्। चतुर्दशशतके पश्चिमवङ्गप्रदेशे अस्य प्रचारः जातः। तत्र कातन्त्रं हि व्याकरणं कतिपयवैलक्ष्यण्येन पाणिनीयेन सह विसंवदते। तत्र हि विशेषः पाणिनेरिष्टः सामान्यं तु शर्ववर्मणः। पाणिनीयं हि व्याकरणं शब्दसाधुत्वस्य विशेषपक्षमेव गृह्णाति, तद्विपरीतं शर्ववर्मा तु सामान्यपक्षमेव। पाणिनीयं व्याकरणं हि वैदिकलौकिकोभयपक्षसम्बद्धं, यदा शार्ववर्मिकं लौकिकपक्षमेव गृह्णाति। पाणिनीयं हि सुविस्तृतं विद्यते, यदा शार्ववर्मिकं तु सामान्यजनप्रवेश्यम्।

**२.४.२. चान्द्रव्याकरणसम्प्रदायः** चान्द्रव्याकरणस्यकर्त्ता आचार्यः चन्द्रगोमी अष्टाध्यायीमाधारीकृत्य पतञ्जलिकृतं महाभाष्यं प्रमाणरूपेण स्वीकृत्य व्याकरणमिदं रचितवान्। अस्य व्याकरणस्य षडध्यायाः सम्प्रति उपलभ्यन्ते। वस्तुतः व्याकरणे अस्मिन् अष्टौ अध्यायाः आसन् इति समीक्षकाणां मतम्। अस्मिन्व्याकरणे प्रथमाध्यायतः षष्ठाध्यायं यावत् लौकिकशब्दानाम् अनुशासनं वर्तते। सप्तमाष्टमाध्याययोः वैदिकशब्दानां स्वरविधिसहितमनुशासनं प्राप्यते। अधुना उपलब्धे चान्द्रव्याकरणे षडध्यायाः सन्ति। प्रत्यध्यायं चत्वारः पादाः इति साकल्येन चतुर्विंशतिः पादाः सन्ति। चतुर्विंशतौ पादेषु साकल्येन ३०५८सूत्राणि सन्तीत्यतः व्याकरणमिदं त्रिमुनिव्याकरणापेक्षया किञ्चिल्लघु वर्तते।

लाघवं विस्पष्टत्वं सम्पूर्णत्वञ्च अस्य व्याकरणस्य प्रधानवैशिष्ट्यमिति। अस्मिन् व्याकरणे सूत्रपाठः, वर्णसूत्रपाठः, धातुपाठः, गणपाठः, उणादिपाठः, लिङ्गानुशासनम्, उपसर्गवृत्तिः, परिभाषापाठः, शिक्षासूत्रपाठः, कोषः चेति दश अङ्गानि सन्ति। अत्र धातुपाठस्य दशगणेषु ११७४धातवः, गणपाठे २२६गणाः, उणादिपाठे त्रिषुपादेषु ३२८सूत्राणि, तथा परिभाषापाठे ८६परिभाषाः समाविष्टाः सन्ति। अस्य लिङ्गानुशासनं सम्प्रति न प्राप्यते। सरलया शैल्या लोकप्रसिद्धानां सततं प्रयुज्यमानाना- मुदाहरणप्रत्युदाहरणनां संकलनमपि अस्य व्याकरणस्य विस्पष्टत्वस्य अन्यतमं कारणम्। संस्कृतभाषायाः प्रचारे व्याकरणस्य काठिन्यमेव कारणमिति अनुमाय चन्द्राचार्यः स्वव्याकरणं यथासम्भवं सरलीकर्तुं प्रयत्नं कृतवान्। तेन स्वव्याकरणे वार्त्तिक- कृद्भाष्यकृद्भ्यां विहिताः परामर्शाः स्वसूत्रैः समाकलिताः। चन्द्रगोमिना वार्त्तिकभाष्यसमीकरणेन यत्सूत्रस्वरूपं निरूपितं, तेषामात्मसात्करणे क्लेशानुभवः न भवति। अपि च सूत्रवार्तिकेष्टीनां समावेशस्य हेतोः व्याकरणमिदं सम्पूर्णं भवति।

**२.४.३. हैमव्याकरणसम्प्रदायः** मीढाख्यवैश्यवंशजः पाहिनीचाचिङ्गयोः सुपुत्रः आचार्यचन्द्रदेवसूरिशिष्यः धुन्धुकाग्राम- निवासी हैमसम्प्रदायस्य प्रवर्तकः जैनधर्मे दीक्षितात् प्राग्भिन्ननामकः एकादशशतके आविर्भूतः प्रसिद्धजैनाचार्यः कलिकाल-सर्वज्ञः हेमचन्द्रसूरिः गुर्जरदेशाधिपस्य सिद्धराजस्यादेशेन सिद्धहैमशब्दानुशासनाख्यं सर्वाङ्गपरिपूर्णं व्याकरणग्रन्थं विरचितवान्। पाणिनेरष्टाध्यायीवदस्मिन् अष्टावध्यायाः, एकैकस्मिन् अध्याये च चत्वारः पादाः इह सन्ति। इदं संस्कृतप्राकृतोभयभाषयोः व्याकरणमस्ति। प्रारम्भिकेषु सप्तसु अध्यायेषु अष्टाविंशतिपादेषु ३५६६सूत्रैः संस्कृतभाषायाः अनुशासनं क्रियते तथा अस्यावसाने नामास्य अन्तिमेऽष्टमाध्याये च १११९सूत्रैः महाराष्ट्री-शौरसेनी-मागधी-पैशाची-चूलिका-पैशाची-अपभ्रंशप्रभृतीनां प्राकृतभाषाणाञ्चानुशासनं दृश्यते। कातन्त्रव्याकरणवदस्मिन्व्याकरणे प्रक्रियानुसारिक्रमः एव स्वीकृतः दृश्यते। ग्रन्थोऽयं पञ्जावयवसंयुतः। अत्र हि सूत्रपाठ-धातुपाठ-गणपाठ-उणादिसूत्रपाठ-लिङ्गानुशासनानि यथास्थानं संन्यस्तानि। हैमधातुपारायण- नामकः ग्रन्थः हैमधातुपाठस्य स्वोपज्ञव्याख्याग्रन्थोऽस्ति। हैमधातुपारायणे नवगणाः ११८०धातवः अर्थसहिताः गद्यपद्योभया- त्मकशैल्या पठिता सन्तः उपलभ्यन्ते। अयं हेमचन्द्रः गणपाठे बहुधा पाल्यकीर्तिमनुसरति इति दृश्यते। हेमचन्द्रकृतस्योपज्ञ- बृहद्वृत्तौ अस्य व्याकरणस्व गणपाठः यद्यपि उपलभ्यते, तथापि तत्र हैमशब्दानुशासने उपदिष्टानां सकलगणानां संग्रहः न दृश्यते। अतः विजयनीतिसूरिणा स्वस्य सिद्धहैमबृहत्प्रक्रियायां समस्तगणानां पाठसंकलनं कृतम्। अत्र संस्कृतप्राकृतोभयविधगणानां पाठः समाहितः। पुनः अस्य उणादिपाठे १००६सूत्राणि विद्यन्ते। अस्य स्वोपज्ञा अष्टाविंशतिशतश्लोकपरिमाणा बृहती वृत्तिः वर्तते। किञ्च अस्य हैमलिङ्गानुशासनं पाणिनीयलिङ्गानुशासनापेक्षया बृहत् विस्तृतं विशदश्च अस्ति। अत्र अनेकेषाम् अप्रसिद्ध-अज्ञात-अल्पज्ञात-शब्दानां चयनपूर्वकं लिङ्गनिर्देशः विहितः दृश्यते। हेमचन्द्रेण एकाकी एव स्वग्रन्थेषु पाणिनेः

सूत्ररचनाकार्यं, भट्टोजिदीक्षितस्य सूत्रव्याख्यानकार्यं, भट्टिकवेः उदाहरणप्रदानकार्यं समाहितम्। सिद्धहैमशब्दानुशासनस्येदं तु भवति सुमहद्वै- शिष्ट्यम्। पुनः अत्र प्राकृतभाषायाः व्याकरणमस्ति तथा हेमचन्द्रादनन्तरं क्रमदीश्वरेण अपि प्राकृतभाषायाः व्याकरणं लिखितम्। अनेन हेमचन्द्राचार्येण स्वसूत्रेषु 'शब्दानुशासनबृहद्वृत्ति' नामकग्रन्थो लिखितः। अतः सिद्धहैमशब्दानुशासनस्य सूत्रवृत्त्यादि-विरचनमाध्यमेन सुमहती परम्परा न केवलं आचार्यहेमचन्द्रेणाक्षुण्णा स्थापिता, अपि त्वन्ये बहुविद्वांसः वैयाकरणाश्चास्याः सुमहत्याः परम्परायाः अग्रयायिनः आसन्।

**२.४.४. सरस्वतीकण्ठाभरणव्याकरणसम्प्रदायः** महाराधिराजः संस्कृतस्य महान्संरक्षकः पुनरुद्धारकः च दरिद्रहृदयाधीश्वरः कविप्राणः विद्वत्संरक्षकः विद्वन्मणिः श्रीमान्भोजदेवः वाचः मलदूरीकरणार्थं 'सरस्वतीकण्ठाभरणम्' इत्यभिधेयं बृहत् शब्दानुशासनं तथा काव्यमलदूरीकरणार्थमपरं 'सरस्वतीकण्ठाभरणम्' इत्यभिधेयं बृहदलङ्कारविषयकं ग्रन्थद्वयं प्रणीतवान्। अस्य 'सरस्वतीकण्ठाभरणम्' इत्यभिधेये बृहच्छशब्दानुशासने अष्टावध्यायाः द्वात्रिंशत्पादाः ६४११सूत्राणि च विद्यन्ते। पाणिनीयं चान्द्रव्याकरणञ्चाधारीकृत्य भोजराजेन व्याकरणमिदं विरचितम्। संक्षेपरुचयः पाणिन्युत्तरवर्त्तिवैयाकरणाः व्याकरणग्रन्थाः च संक्षेपकरणे परिभाषापाठ-गणपाठ-लिङ्गानुशासन-उणादिसूत्रप्रभृतिमहत्त्व- पूर्णविषयान्गौरवभयात्स्वशब्दानु-शासनात्पृथक्कृताः। एदतर्थमध्येतारः एतेषु विषयेषु कदाचिदनभिज्ञाः तिष्ठन्ति। परन्तु राजाभोजेन सरस्वतीकण्ठाभरणे एते सर्वेऽपि धातुपाठ-गणपाठ-वार्त्तिक-इष्टि-लिङ्गानुशासन-उणदिसूत्रप्रभृततिविषयान् मूलग्रन्थे एव समावेश्य सा न्यूनता दूरीकृता। अनेन प्रकारेण सारस्वतसम्प्रदायस्य, जैनशाकटायनव्याकरणस्य, जैनेन्द्रव्याकरणस्य, हरिनामामृतव्याकरणस्य च पञ्चाङ्गव्याकरणं प्राप्यते।

**२.५. पाणिनीयव्याकरणे पञ्चाङ्गव्याकरणस्य स्वरूपम्:** पाणिनीयं हि व्याकरणं पञ्चाङ्गकमित्युच्यते। महर्षेः पाणिनेः प्रधानग्रन्थः भवति सूत्रात्मिका 'अष्टाध्यायी'। 'अष्टकम्', 'शब्दानुशासनम्', 'वृत्तिसूत्रम्', 'अष्टिका' इत्यादिभिर्नामान्तरैरपि विदितायाः अष्टाध्याय्याः प्रारम्भः पाणिनिना "वृद्धिरादैच्" (पा., १/१/१) इति सूत्रेण कृतः। पाणिनिः स्वकीयाष्टाध्यायीग्रन्थे सूत्राणि एव पठति, ततः अयं ग्रन्थः सूत्रपाठः इति नाम्ना जगति ख्यातः। अस्य पाणिनीयसूत्रपाठस्य महत्त्वं सर्वजनविदितम्। इयमष्टाध्यायी मानवमस्तिकस्य सर्वोत्तमा सृष्टि इति विद्वांसः वदन्ति। संस्कृतशब्दानां सिद्धरूपसौष्ठवज्ञानं पाणिनीयव्याकरणज्ञानं विना न संभवत्येवेति निश्चप्रचम्। सुनिपुणवैयाकरणा अपि प्रयोगशरणाः। वैयाकरणनिकाये व्याकरणशास्त्रस्य कायद्योतनाय 'पञ्चाङ्गव्याकरण'शब्दो नाम 'पञ्चाङ्गं व्याकरणम्' इति व्यवह्रियते। तानि च पञ्चाङ्गानि सूत्रपाठः, गणपाठः, धातुपाठः, उणादिपाठः, लिङ्गानुशासनं चेति। एतानि मिलित्वा साङ्गं व्याकरणं भवति। पञ्चानां ग्रन्थानां (पाठानां) समाहारत्वात् पञ्चग्रन्थी (पञ्चपाठी) व्याकरणमित्यप्युच्यते। एतेषु पञ्चस्वङ्गेषु शब्दानुशासनमेव मुख्यम् अन्यानि चाङ्गानि शब्दानुशासनोपकारकत्वाद् गौणानि इति परम्परायां विद्यते। अत एव धातुपाठादीन्यङ्गानि पाणिनीयशब्दानुशासनस्य 'खिल'संज्ञया व्यवह्रियन्ते। अतः पञ्चाङ्गयुक्तस्य पाणिनीयशब्दानुशासनस्य महत्त्वं सर्वातिशायि वर्तते। तत्र - 'अथ शब्दानुशासनम्' इति वचनस्य आदौ उपलम्भात् गणपाठादिपादचतुष्टयं शब्दानुशासनस्य खिलत्वेन (परिशिष्टत्वेन) पण्डिताः स्मरन्ति। पाणिनीयव्याकरणशास्त्रे सूत्रपाठस्यैव प्राधान्यम्। सूत्रपाठे सर्वेषामङ्गानां स्मरणं भवति पाणिनिना। "सर्वादीनि सर्वनामानि" (पा., १/१/२७) इत्यादिसूत्रैः प्रत्यक्षरूपेण गणपाठस्य, "भूवादयो धातवः" (पा., १/३/१) इत्यादिसूत्रैः प्रत्यक्षरूपेण धातुपाठस्य, "उणादयो बहुलम्" (पा., ३/३/१) इति सूत्रेण प्रत्यक्षरूपेण उणादिपाठस्य, "नपुंसकाच्च" (पा., ७/१/१९) इत्यादिसूत्रैः अप्रत्यक्ष-रूपेण लिङ्गानुशासनस्य सूचना प्राप्यते। तस्मात् शब्दानुशासने सूत्रपाठस्यैव प्राधान्यमन्येषां गणपाठादीनां च खिलपाठता परिशिष्टता वा ज्ञेया। अस्य व्याकरणस्य पञ्चावयवाः समासेन आलोच्यन्ते।

**२.५.१. अष्टाध्यायीसूत्रपाठः** अत्र अष्टाध्याय्यां सूत्राणि एव सन्ति। इदं सूत्रं तु परमकल्याणकरं भवति। अत्र सूत्रे एकस्यापि वर्णस्य आनर्थक्यं न विद्यते। वेदमन्त्राः इव अष्टकसूत्राणि भवन्ति। अत्र अध्यायाः - ८, पादानि -३२, सूत्राणि - प्रायतः ४०००। तत्र अष्टाध्यायीस्थसूत्राणां सङ्ख्याविषये मतभेदाः सन्ति। कुत्रचित् कथ्यते हि पाणिनीयसंहितायां ३९९६सूत्राणि (त्रीणि सूत्रसहस्राणि तथा नवशतानि च। षण्णवतिश्च सूत्राणां पाणिनिः कृतवान् स्वयम्।।), कुत्रचित् ३९८३ (लोकमणिदाहलः, पृ., ८२), कुत्रचित् ३९७७ (गुरुप्रसादशास्त्रिसम्पादिताष्टाध्यायीसूत्रपाठानुसारेण), कुत्रचित् ३९७८ (हरयाणा-साहित्य-संस्थानस्य महाभाष्यसंस्करणे, भा.- १, पृ., ३), कुत्रचित् ३९७३ (शङ्कररामशास्त्रिणा संशोधिताष्टाध्यायीसूत्रपाठसंस्करणे), कुत्रचित् ३९७५ (भवानीशंकर- सुक्ठणकरसंशोधिताष्टाध्यायीसूत्रपाठसंस्करणे, बम्बई), कुत्रचित् इतोऽपि अधिकसूत्राणि तथा कुत्रचित् इतोऽपि न्यूनसूत्राणि सन्तीति वर्णना ग्रन्थान्तरेभ्यः प्राप्यन्ते। सूत्राणां योगविभागपद्धतिमा आश्रित्य कदाचित् इयं संख्या वर्द्धते तथा कदाचित् न्यूना भवति इति। अतः प्रायतः ४०००सूत्राणि सन्ति इति वक्तुम् उचितं भवति। यत्किमपि वा भवतु अष्टाध्याय्याः षष्ठाध्यायस्य प्रथमपादे सर्वाधिकरूपेण २२३सूत्राणि तथा द्वितीयाध्यायस्य द्वितीये पादे सर्वन्यून३८सूत्राणि विद्यन्ते। अस्य ग्रन्थस्य महत्त्वादिविषये अन्यत्रवर्णयामः।

**२.५.२. धातुपाठः** "भूवादयो धातवः" (पा., १/३/१) इत्यनेन सूत्रेण विहिताः धातवः अत्र परिगणिताः भवन्ति। अत्र धातुपाठे भ्वादि-अदादि-जुहोत्यादि-दिवादि-स्वादि-तुदादि-रुधादि-तनादि-क्र्यादि-चुरादिरूपेषु दशगणेषु प्रायतः २००० संख्यकमूलधातूनां परिगणनं भवति। परन्तु एतेषां संख्याविषये ऐक्यमतं न प्राप्यते। भिन्नभिन्नसंस्करणेषु अस्य धातुपाठस्य धातूनां संख्या कदाचित् परिवर्द्धते कदाचित् ह्रसते च। एतेषु गणेषु भ्वादिगणे सर्वाधिकसंख्यकाः धातवः अर्थात् एकसहस्राधिकाः धातवः विद्यन्ते। एते धातवः परस्मैपदम्/परस्मैभाषः, आत्मनेपदम्/आत्मनेभाषः, तथा उभयपदम् इति दृष्ट्या त्रिधा विभक्ताः। भिन्नभिन्नगणे प्रायतः भिन्नभिन्नविकरणाः आगच्छन्ति। क्रमेण यथा- शप् (अ), शप् (०), शप् (०), श्यन् (य), श्नु (नु), श (अ), श्नम् (न), उ (उ), श्ना (ना), णिच् (इ)। अत्र पाणिनीये धातुपाठे पठिताः धातवः प्रायतः अनुबन्धयुक्ताः भवन्ति। यथा - 'डुकृञ्करणे'। अत्र धातुः भवति - 'कृ'। परन्तु इह ड्-उ-ञ्काराः अनुबन्धरूपेण विद्यन्ते। किन्तु कदाचिदनुबन्धरहिताः अपि धातवः परिलक्ष्यन्ते। यथा- 'ऋ गतिप्रापणयोः'। पुनः पाणिनीयधातुपाठे पठिताः कतिपयधातवः लोके नामवाचकपदरूपेण व्यवहृताः भवन्ति। यथा- पुष्प (पुष्प विकसने, दिवादिः, परस्मैपदी, सकर्मकः, सेट्), हल (हल विलेखने, भ्वादिः, परस्मैपदी, सकर्मकः, सेट्), खल (खल संचये, भ्वादिः, परस्मैपदी, सकर्मकः, सेट्) इत्यादयः। पुनः यद्यपि पाणिनीयधातुपाठे अनुपसर्गधातवः पठिताः भवन्ति, तथापि कतिपयधातवः तत्र विद्यन्ते ये तु उपसर्गयुक्ताः भवन्ति। यथा - निवास (नि + वास, वास उपसेवायाम्; निवास आच्छादने), संग्राम (सम्+ ग्राम, ग्राम आमन्त्रणे; संग्राम युद्धे), व्यय (वि + अय, अय गतौ; व्यय गतौ, व्यय वित्तमुत्सर्गे) इत्यादयः। पाणिनीयधातुपाठे पठितेषु धातुषु केचन एकस्मिन्नेव समये नामरूपेण अथवा तिङन्तरूपेण व्यवहृताः भवन्ति, यथा- मुण्ड (मुण्ड मार्जने, भ्वादिः, आत्मनेपदी, सकर्मकः, सेट्), मिश्र (मिश्र सम्पर्के, चुरादिः, उभयपदी, सकर्मकः, सेट्) इत्यादयः। स्वयं भाष्यकारः अपि एतादृशनामानि पक्षान्तरे धातुरूपेण स्वीकरोति। यथा-'अथवा धातव एव मुण्डादयः। न चैव ह्यर्था आदिश्यन्ते क्रियावचनता च गम्यते।' (महाभाष्यम्, पा., ३/१/८)। येन प्रकारेण कण्ड्वादयः नामरूपेण सुप्-

विभक्तिं धारयन्ति, तथा आख्यातरूपेण तिङ्विभक्तिं तेनैव प्रकारेण एते मुण्ड-मिश्रादयः। अस्मिन् विषये कैयटाचार्यः वदति -'यथा कण्ड्वादयो द्विविधास्तथा मुण्डादय इति भावः' (महाभाष्यम्, पा., ३/१/८)। यद्यपि धातुपाठे प्रायतः द्विसहस्रसंख्यकाः धातवः विद्यन्ते तथापि लौकिकालौकिव्यवहारे प्रायतः एकसहस्रसंख्यकाः धातवः समुपलभ्यन्ते {Whitney probably has collected nearly 1000 roots actually used in vedic & classical literature. (A Hand Book of Sanskrit Philology, Prof. S. R. Banerji, The Sanskrit Book Depot. (P) Ltd., Calcutta, 1st., Edn., Nov., 1987, p.-171)}। धातुपाठे पठिताः धातवः अर्थयुक्ताः भवन्ति। यथा- 'भू सत्तायाम्' इति। तत्र 'गतौ' इति अर्थे सर्वाधिक-संख्यकाः धातवः प्रयुक्ताः भवन्ति। पुनः उपसर्गयोगेऽपि धातूनाम् अर्थपरिवर्त्तनं भवति एव। यथा- √हृ प्रहार:विहार:आहार:परिहार:संहारः। अतः लिङ्गमिव, वचनमिव धातूनामर्थविषयेऽपि लोकाः प्रामाणं भवितुमर्हन्ति इति वक्तुं शक्यते। धातुपाठस्य पाणिनीयत्वेऽपि गणपाठवत् पण्डिता नैकमत्यं भजन्ते तथा केचन अस्य अपाणिनीयत्वं प्रतिपादयन्ति।

**२.५.३. गणपाठः** गणानां विधानार्थं 'गणपाठः' विद्यते। पञ्चाङ्गव्याकरणे सूत्रपाठधातुपाठाभ्यामनन्तरं गणपाठस्य तृतीयं स्थानं वर्तते। किन्तु सूत्रपाठप्रधाने व्याकरणे अवशिष्टाश्चत्वारो ग्रन्थाः खिलपदवाच्याः पृथक्पृथक्ते महत्वपूर्णाः विद्यन्ते। एवंरीत्या खिलपाठेषु गणपाठस्य द्वितीय स्थानमस्ति। 'गणयतीति गणः' इति व्युत्पत्त्या 'गण संख्याने' इत्यस्माच्चौरादिकाद्धातोः "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" (पा., ३/१/१३४) इति सूत्रेण अच्प्रत्ययान्तः गणनार्थको निष्पद्यतेऽयं 'गण'शब्दः। अतः सङ्ख्यानार्थकाद् गणधातोनिष्पनो गणशब्दः सङ्ख्येयशब्दबोधकः। 'पठ्यतेऽनेनेति पाठः', 'गणानां पाठो गणपाठः' इयि व्युत्पत्या 'गणपाठ'शब्दो निष्पन्नः। गणानां नाम क्रमविशेषेण पठितानां शब्दसमूहानां पाठो यत्र ग्रन्थे विधीयते, स गणपाठ इत्यभिधीयते इति रीत्या धातुपाठेऽपि गणपाठ एव धातवोऽपि भ्वादिप्रभृतिगणेषु परिगणिततत्वात् गणपाठत्वापत्तिः। किन्तु वैयाकरणनिकाये गणपाठो न यौगिकः, अपितु तादृशग्रन्थावबोधरूपेऽर्थे योगरूढः। यत्र केवलं प्रातिपदिकशब्दसमूहानां सङ्कलनम्भवति। अतः योगरूढत्वेन प्रातिपदिकपाठ एव गणपाठनाम्ना व्यवहृतः। एवमेव गणपाठोऽपि पाणिनेर्महद्वैशिष्ट्यम्। गणसमूहसमुदायेष्वयमेव भेदो यद्गणे पौर्वापर्यस्य कोऽपि विशिष्टक्रमो भवति समूहे वा समुदाये नैव। तेन क्रमविशेषेण पठितानां शब्दानां पाठ एव गणपाठ इतीरितः। लाघवप्रयास एव गणपाठस्य योनिः इति ख्यातः। प्राक्काले हि यदा प्रतिपदपाठः प्रचलित आसीत्तदापि स्वरूपसाम्याधारेण शब्दसमूहा एकत्र निर्वाचिता आसन्। पश्चाद्वर्तिकाले यदा प्रतिपदपाठप्रक्रियया लक्षणात्मकस्वरूपं गृहीतं तदापि समानकार्य-ज्ञापनार्थं निर्देष्टव्यप्रातिपदिकानां समूहास्तत्सूत्राणां सद्योऽनन्तरमेवोपन्यस्ताः। अतः गणपाठसाहाय्यादेव प्रतिपदपाठभराद्व्याकरणं मुक्तं सल्लघु सुपाठ्यञ्च सञ्जातम् इति विषये नास्ति द्विमतम्। प्राक्तनकाले सूत्रव्याख्यातार एव धातुगणपाठादीनां प्रवक्तारोऽ-प्यासन् व्याख्यावसरे तेषामुपस्थितेरपरिहार्यत्वात्। तेनैव पाणिनेः पूर्ववर्तिनोऽपि ये ये सूत्रकारा आसंस्तैर्धातुगणपाठादयोऽपि प्रोक्ता एव। तेषु भागुरिः शन्तनुः, काशकृत्स्नः, आपिशलि-इत्यादयश्च सूत्रकारत्वेन गणवाचकत्वेन प्रसिद्धाः आसन्। प्रातिशा-ख्येष्वपि कतिपयेषु गणशैली समवलम्बिताऽऽसीत्। सम्प्रति तु पाणिनीय एव गणपाठः सर्वातिशायित्वेन विराजते।

गणपाठस्यापि वृद्धपाठ-लघुपाठयोरवस्थितिमधिवचन्ति केचन पण्डिताः। तेषां विचारे अधुनोपलब्धपाठः वृद्धपाठः लघुपाठस्य विलुप्तित्वात्। गणपाठस्य पाणिनीयत्वेऽपि धातुपाठवत् पण्डिता नैकमत्यं भजन्ते तथा केचन अस्य अपाणिनीयत्वं सप्रमाणं प्रतिपादयन्ति। एतेषु न्यासकारस्य प्राथम्यं विद्यते। तस्य मते यथा -

'यदि तर्हि बभ्रुशब्दस्य गर्गादिपाठादेव सिद्धे कौशिके नियमार्थमिह ग्रहणम्, एवं सति नार्थो गर्गादिषु पाठेन, कौशिके विध्यर्थमेव ग्रहणमस्तु, नास्य? इत्यत आह - 'गर्गादिषु पाठोऽपि' इत्यादि। गर्गादिषु पाठोऽपि कर्तव्यः। 'सर्वत्र लोहित' पा., ४/१/१८) इत्यादिनान्तर्गणकार्यं ष्फो यथा स्यात्। अथ गण एव कौशिकग्रहणं कस्मान्न कृतम्, कः पुनरेवं सति गुणो भवति, सूत्रे पुनर्बभ्रुग्रहणं न कर्तव्यं भवति? सत्यमेतत् 'अपाणिनीयत्वात्' गणस्य। नैवं चाकरणे पाणिनिरुपालम्भमर्हति। गणकारेणापि हि किं न कृतम्? वैचित्र्यार्थम्। विचित्रा हि गणस्य कृतिर्गणकारेण?' (न्यासः, पा., ४/१/१०६)

किन्त्वपरे विचक्षणा हि तं पाणिनीयमेव मन्यन्ते तस्य सूत्रैस्सह अपरिहार्यसम्बन्धत्वात्। प्राचीने काले यदा पाणिनिराचार्यो स्वसूत्राणां व्याख्यानकाले शिष्यैः पृष्टः सन्गणान्तर्वर्तिप्रातिपदिकानि निर्दिदेश तदा शिष्यैः स एव पाठः संगृहीतः तथा परम्परयाऽधुनाऽपि गणपाठरूपेण लभ्यः। गणपाठस्य पृथक्करणेन शब्दानुशासने लाघवं तु समापतितं, किन्तु तेन वैयाकरणानामपि गणपाठो विचारबाह्यः सञ्जातः। अर्थात् तेन गणपाठस्य परम्परैव लुप्तप्राया सञ्जाता।

एकप्रकृतिका शब्दा एकस्मिन् गणे पठ्यन्ते। अत्र गणपाठे२६२गणाः सन्ति। यथा- "गर्गादिभ्यो यञ्" (पा., ४/१/१०५), "बह्वादिभ्यश्च" (पा., ४/१/४५), "शिवादिभ्योऽण्" (पा., ४/१/११२), "अर्शआदिभ्योऽच्" (पा., ५/२/१२७) इत्यादिसूत्रेषु विद्यमानेषु गर्गादि-बह्वादि-शिवादि-अर्शआदि-गणपाठेषु अपि यथासम्भवं तत्प्रकृतिकशब्दाः सङ्गृहीताः भवन्ति। यत्र च तदप्यसम्भवं तत्र आकृतिगणोऽयमिति निर्देशः कृतो भवति गणकारेण। तस्याशयश्च गणोऽयमाकृत्यैव ज्ञातव्य इति। गणपाठविषये Paul Kiparsky वदति - 'GaÆapÁÔha: a list of 261 lists of lexical items which are idiosyncratically subject to certain rules. Some of the lists are open-ended, and (like the DhÁtupÁÔha) they have to some extent been modified by later grammarians.' (On the Architecture of PÁÆini's Grammar, Paul Kiparsky, Stanford University, p., - 2)। गणपाठे गणान्तर्गतसूत्राणि अपि विद्यन्ते तानि गणसूत्राणि इति आख्यायन्ते।

**गणाश्च द्विविधा:सन्ति। यथा**

(क) नियताः

(ख) आकृतिबोध्याश्च।

**(क) नियताः** यस्मिन् गणे पठिताः शब्दाः नियतसंख्याविशिष्टाः भवन्ति, तादृशगणाः नियतगणाः भवन्ति। यथा - प्रादयः (पा., १/४/५८)। अत्र गणे द्वाविंशतिसंख्यकाः शब्दाः सन्ति। अतः परिमितसंख्यकशब्दानां ग्रहणहेतोः नियतगणः अयम्। तत्र नियतास्त एव येषां सङ्ख्या सूत्रे अथवा गणपाठे निर्दिष्टा भवति। अतः एतादृशगणः द्विप्रकारकः भवति –

**(अ) सूत्रोक्तनियतगणः** यदा सूत्रे गणान्तर्गतपदानां सङ्ख्या नियताः सन्ति तदा अयं गणः भवति। अयं गणः अपि द्विविधः। यथा - (ब) सूत्रोक्तनियतगणः तथा (स) सूत्रे नियतगणः।

**(ब) सूत्रोक्तनियतगणः/सङ्ख्यातगणाः** तत्र सूत्रे येषां सङ्ख्या निर्दिष्टा भवति त एव सन्ति सूत्रोक्तनियतगणाः सङ्ख्यातगणाः वा। यथा - "पूर्वादिभ्यो नवभ्यो वा" (पा., ७/१/१६), "शमामष्टानां दीर्घः" (पा., ७/३/७४), "किरश्च पञ्चभ्यः" (पा., ७/२/७५), "जक्षित्यादयः षट्" (पा., ६/१/६) इत्यादयः। अत्र सूत्रे एव एषां सङ्ख्या निर्दिष्टा भवति।

**(स) सूत्रे नियतगणः** पुनः प्रातिपदिकानां समानप्रकृतिकत्वेऽपि यदा तेषां सङ्ख्या नितान्तमेव सीमिता भवति, तदा ते सूत्र एवापि निर्दिष्टाः सन्ति। यथा

"पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्" (पा., १/१/३४) इत्यत्र 'पूर्वपरावरदक्षिणोत्तरापराधराणि' परम्परायां 'पूर्वादि' इति।

**(आ) गणपाठोक्तनियतगण:** गणपाठे गणोक्तशब्दा: यदा सीमिता: भवन्ति तदा ते एव सन्ति गणपाठोक्त- नियतगणा:। यथा - "सर्वादीनि सर्वनामानि" (पा., १/१/२७), "अदिप्रभृतिभ्य: शप:" (पा., २/४/७२), "साक्षात्प्रभुतीनि च" (पा., १/४/७४ ) इत्यादौ। एतादृशसूत्रेषु गणनिर्देशश्च संज्ञिशब्दानन्तरत्रयुक्त-आदि-प्रभृतिशब्दै: कृतोऽस्ति। अत्र सर्वादिगणे पठिता: पञ्चत्रिंशत्संख्यका: ('सर्वादयश्च पञ्चत्रिंशत्।' सिद्धान्तकौमुदी, २१७, पा., ७/१/५२ ) शब्दा: तथा कश्चित् व्यतिक्रमं त्यक्त्वा सर्वाद्यन्तशब्दा: ('तदन्तस्यापीयं संज्ञा। 'द्वन्द्वे च' इति ज्ञापकात्।' सिद्धान्तकौमुदी,२१३, पा., १/१/२७) अपि सर्वनामसंज्ञका: भवन्ति।

**(ख) आकृतिबोध्यगणा:/आकृतिगणा:** अस्य गणस्यापरं नाम भवति आकृतिगण: इति। अत्र गणे केचनशब्दा: निर्दिष्टा: सन्ति। पुन: तेषां समरूपशब्दा: प्रतिरूपकशब्दा: वा तत्र गणे स्वीकृता: भवन्ति। अत: आकृतिगणे अपरिमिता: शब्दा: भवन्ति। यथा प्रकृत्यादिगण: ("प्रकृत्यादिभ्य उपसंख्यानम्", वार्तिकम्, काशिका, पा., २/३/१८)। आकृतिगणविषये अभ्यङ्करमहोदया: वदन्ति –
'A class or group of words in which some words are actually mentioned & room is left to include others which are found undergoing the same operations. (A Dictionary of Sanskrit Grammar, P., 54, आकृतिगण)। पुन: अस्मिन्विषये काशिकाकार: वदति- 'अव्यक्तत्वाच्च। आकृतिगणोऽयम्'। (काशिका, पा., २/१/४८)। हरदत्त:अपि वदति 'प्रयोगदर्शनेन आकृतिग्राह्यो गण: आकृतिगण:। अत्र आदिशब्द: प्रकारे'। (पदमञ्जरी, पा., २/१/५९)। पुन: कुत्रचित्तु पठितगणेऽपि च शब्दयोगेन आकृतिगणश्च सूच्यते। यथोक्तं न्यासे- (क) 'चकारोक्तसमुच्चयार्थ:। स च आकृतिगणतां सुषमादेर्बोधयति।' (पा., ८/३/१००), (ख) 'आकृतिगणश्च प्रवृद्धादिद्रष्टव्य इति। कुत एतत्? आकृतिगणतां तस्य सूचयितुमनुक्तसमुच्चयार्थस्य चकारस्येह करणात्।' (पा., ६/२/१४७)

**२.५.४. उणादिपाठ:** यस्या: कस्या: अपि परम्पराया: यत् किञ्चिदपि शब्दानुशासनं कियदपि विशालं कथं वा न भवेत्, परन्तु तदनन्तशब्दराशे: सकलानां शब्दानां च यथार्थरूपेण संग्राहकं कदापि भवितुं न अर्हति। तत: शब्दानुशासनं विस्तृतमपि सन्निदर्शकमात्रमेव भवति। तथैवोणादिसूत्राणि अतिसूक्ष्मानि, अत एव कारणाद् विशेषत: शब्दानां प्रकृतिप्रत्ययविभाग-निदर्शकान्येव सन्ति। पुरा यदा संस्कृतभाषाया: सर्वाण्यपि नामानि अव्ययानि च यौगिकत्वेन स्वीकृतानि आसन्, तदा उणादि-सूत्राणि शब्दानुशासनस्य कृदन्तप्रकरणान्तर्गतान्येव आसन्निति प्रतिभाति। किन्तु गच्छता कालेन प्रायश: कालमहिम्ना मानवानां मेधाधारणशक्तयो: चरमह्रासेन यौगिकार्थानां शब्दानां धातुप्रत्ययसम्बद्धयौगिकार्थस्य अप्रतीतिस्तथा स्वरवर्णानुपूर्विविशिष्ट-समुदायस्य अर्थविशेषस्य च प्रतीतिर्जायते स्म। एतस्माद्धेतो: संस्कृतभाषाया: सहस्रं शब्दा: शाब्दिकै: रूढशब्दत्वेन अङ्गीकृत्य सङ्गृहीता: आसन्। अवस्थायामस्यामपि शाब्दिकेषु शाकटायनात् नैरुक्तेषु गार्ग्यादितरे समेऽप्याचार्या: तथोक्तरूढशब्दानपि यौगिकशब्दत्वेन अङ्गचकुर्वन्। यास्कीयनिरुक्तस्य प्रथमाध्याये द्वादशत्रयोदशचतुर्दशखण्डेषु विषयोऽयं सुप्रपञ्चित: दृश्यते। तदन्ते तथोक्तरूढशब्दानां यौगिकत्वपक्षस्समर्थितश्च। शाकटायनमतिरिच्य प्राय: समैरपि शाब्दिकै: सहस्रं शब्दान् रूढानङ्गी-कृतवद्भि: तेषां यौगिकत्वरूप: प्राचीनपक्ष: सुरक्षितस्तथैव नैरुक्ताचार्यमतमनुसृत्य रूढशब्दानां धातुप्रत्ययनिदर्शनार्थ-मुणादिसूत्ररूपं कृदन्तभागं शब्दानुशासनात्पृथक्कृत्य तस्य शब्दानुशासनस्य खिलपाठरूपं समकल्पि। अनेन प्रकारेण उणादिसूत्राणां शब्दानुशासनस्य खिलपाठरूपकल्पनेऽपि वैयाकरणदृष्ट्या एतन्मूल्यं यद्यल्पीयस्स्यात्, परन्तु नैरुक्ताचार्याणां मतमनुसृत्य सम्पूर्णशब्दानां यौगिकत्वपक्षं समर्थयतां शाब्दिकानां दृष्टौ एषां मूल्यं शब्दानुशासनस्य कृदन्तभागापेक्षया न कथमप्यल्पम्। भगवता पतञ्जलिना उणादिसूत्राणां महत्वं निदर्शनत्वञ्चोररीकुर्वता श्लोकवार्त्तिकमुखेन इत्थं प्रत्यपादि –

> बाहुलकं प्रकृतेस्तनुदृष्टे: प्राय: समुच्चयनादपि तेषाम्।
> कार्यसशेषविधेश्च तदुक्तं नैगमरूढिभवं हि सुसाधु।
> नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्।
> यन्न विशेषपदार्थसमुत्थं प्रत्ययत: प्रकृतेश्च तदूह्यम्।।
> कार्याद्विद्यादनुबन्धम् एतच्छास्त्रमुणादिषु।। (महाभाष्यम्, श्लोकवार्त्तिकम्, पा., ३/३/१)

अस्य श्लोकवार्त्तिकस्य अयमर्थ: - "उणादयो बहुलम्" (पा., ३/३/१) इति सूत्रे बहुलपदनिर्देशेन कतिपयधातुभ्य: उणादिप्रत्ययविधानं दृश्यते। समेषामपि प्रत्ययानां समुच्चयो पाठो न विहित:। प्रकृतिप्रत्ययकार्याण्यप्यवशिष्टानि। सूत्रै: सर्वं कार्यं न विहितम्। परं सूत्रकारेण एवं किमभिलक्ष्य कृतम्? इदं ह्युत्तरम्। वैदिकानां रूढानाञ्च शब्दानां साधुत्वमेभि: सूत्रै: स्यादिति। निरुक्ते नामशब्दास्समेऽपि धातुजा इत्युक्तम्। शाकटायनमतमप्यदमेव। अत: येषां शब्दानां प्रकृतिप्रत्ययविशिष्ट-स्वरूपं लक्षणैरज्ञातं तेषां प्रकृतिं वीक्ष्य प्रत्यय:, प्रत्ययमवलोक्य प्रकृतिश्च ऊह्या। इत्थमेव धातुप्रत्ययगतकार्यविशेषमवलम्ब्य अनुबन्धा: ज्ञेया:।
प्राचीनग्रन्थकारैरुणादिपाठस्य कृते उणादिकोश-उणादिगण-उणादिनिघण्टु-उणादिगणसूत्रशब्दानां प्रयोग: सुष्ठु विहित:। विभिन्नवैयाकरणैरुणादिपाठ: पूर्वं विहित:। अनेन प्रकारेण पाणिनिना अपि विहित:। उणादिसूत्राणामुपादेय-त्वविषये पाणिनीयत्वा-पाणिनीत्वविषये च पण्डिता नैकमत्यं भजन्ते। केचित्पण्डिता: उणादिसूत्राणि पाणिनीयानि मन्यन्ते तथा केचित्गणपाठवत् धातुपाठवदेतानि अपाणिनीयानि नाम शाकटायनप्रणीतानि इति दृढं प्रतिपादयन्ति। तत्र परम्परायां पञ्चपादी तथा दशपादी इति भेदेन उणादिसूत्राणि प्राप्यन्ते। केचन अभिलषन्ति इतरशाब्दिक इव पाणिनिरपि सर्वानेव शब्दान् यौगिकान्मन्यते कामं तेषां योगिकत्वं कुत्रचिद् ज्ञेयमपि स्यात्। तादृशा हि अव्युत्पन्ना एवं शब्दा मता:। येषां सुस्पष्टं यौगिकत्वं ते हि शब्दानुशासने व्याख्याता:। येषाञ्च यौगिकत्वं क्लिष्टं तेषां सिद्धये उणादिसूत्राणि पाणिनिना प्रोक्तानि। तानि च "उणादयो बहुलम्" (पा., ३/३/१) इति सूत्रव्याख्यावसरे के च ते उणादय:? इति शिष्यै: पृष्ट आचार्य: पाणिनि: पञ्चपादीनुक्तवान् यस्या व्यवस्थितं स्वरूपमेव दशपादी उणादिपाठ:। दशपादी-पञ्चपाद्योरयमेव भेदो यत्पञ्चपादी पञ्चसु पादेषु विभक्ता तथा तत्र ७५२सूत्राणि सन्ति (तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठसंस्करणे; उणादिकोश:, २००४ ख्री.अ.)। दशपादी तु दशसु पादेषु विभक्ता, तत्र आहत्य ७२७सूत्राणि सन्ति। परन्तु सूत्रसंख्याविषये ग्रन्थान्तरेषु वैमत्यं विद्यते। अत्र पञ्चपादी उणादिपाठ: पाणिनिकृत: इति विचार: प्रायत: प्राप्यते।
तदिदं सर्वेषां नाम्नां यौगिकत्वं विना उणादिसूत्राणां साहाय्यं कृदन्तप्रकरणस्थै: सूत्रै: निर्वोढुमशक्यमिति तु तत्त्वम्। उणादिसूत्राणि चेमानि अस्मत्परिचितानां रूढत्वेनावगतानां बहूनां पदानामवयवव्युत्पत्तिसूचनेनोपकुर्वन्तीत्येव न किन्तु अश्रुतादृष्टा-तिविचित्रवस्तुजातनिर्माणक्षमे अधुनातने जगति तादृशपदार्थवाचकानां नूतनानां पदानां सृष्टिप्रक्रियायामप्युपकारकाणीति संस्कृतभाषासम्पत्ति संवर्धने सूत्रणामेषां योगदानमनितरसाधारणम्।

**२.५.५. लिङ्गानुशासनम्:** लिङ्गानुशासनं नाम शब्दानुशासनस्य अवयवभूतम्। तद्विना शब्दानुशासनमपूर्णमेव प्रतिभाति। लिङ्गज्ञानकाठिन्यदूरीकरणार्थं लिङ्गानुशासनस्य प्रवचनमाचार्येण विहितम्। लिङ्गानुशासनं धातुपाठ-गणपाठो-

णादिपाठात् शब्दानुशासनस्य केनचिद् विशिष्टेन सूत्रेण, कैश्चित् सूत्रैर्वा प्रत्यक्षरूपेण नाभिसम्बध्यते। अतो लिङ्गानुशासनं शब्दानुशासनस्य साक्षादवयवत्वेन अवश्यमेव स्वीकर्तव्यम्। अत एव प्रायेण सर्वैरपि वैयाकरणैः शब्दानुशासन-प्रवक्तृभिः स्वतन्त्रेण सह तत्सम्बद्धितलिङ्गानुशासनमपि प्रोक्तम्। अनेकैश्च हर्षवर्धनवामनप्रभृतिभिर्ग्रन्थकारवैयाकरणैः शब्दशास्त्रप्रवचनमविधाय लिङ्गज्ञानकाठिन्यदूरीकरणार्थं केवलं लिङ्गानुशासनानामेव प्रवचनं विहितम्। किञ्च बहुना पाणिनिप्रोक्तमेव लिङ्गानुशासनं सम्प्रत्युपलभ्यते आर्यग्रन्थावशिष्टत्वेन। लिङ्गानुशासनस्य पाणिनीयत्वे यद्यपि केचन निष्प्रमाणां शङ्कामुपस्थापयन्ति, तथापि प्रौढविद्वद्भिः स एव वादः अमूलकत्वेन नाङ्गीक्रियते। पाणिनीयव्याकरणे लिङ्गमाश्रित्य अनेकानि कार्याणि विविधसूत्रैः निर्दिष्टानि सन्ति। यथा- "स्वमोर्नपुंसकात्" (पा., ७/१/२३), "नपुंसकाच्च" (पा., ७/१/१९), "नपुंसकस्य झलचः" (पा., ७/१/७२), "आङो नाऽस्त्रियाम्" (पा., ७/३/१२०) इत्यादिसूत्राणि। यदाऽऽचार्य एतादृशानि सूत्राणि व्याख्यातवांस्तदा सम्भवतः शिष्यैरवश्यमेव पृष्टं को विधिलिङ्गज्ञानायेति। तदा ह्याचार्यो लिङ्गानुशासनं सम्भवतः प्रोक्तवान्, यच्च शिष्यैः संगृहीतं परम्परया प्रचलितञ्च। पाणिनीयं हि लिङ्गानुशासनं सूत्रबद्धमस्ति। तेन हि तज्ज्ञानसौकर्यायानेकैराचार्यैस्तच्च व्याख्यातम्। तादृशेषु लिङ्गानुशासनव्याख्यातृषु भट्टोत्पल-रामचन्द्र-भट्टोजि-नारायणभट्ट-रामानन्द-प्रभृतय उल्लेखनीयाः सन्ति। अत्र १८९सूत्राणि सन्ति।

**३.१. उपसंहारः** सकलव्याकरणेषु रत्नायमानं साङ्गोपाङ्गं संस्कृतव्याकरणं पञ्चाङ्गयुक्तं पाणिनीयमेव समुपलभ्यते। पाणिनीयव्याकरणग्रन्थाः गीर्वाणवाण्याः प्राचीनेष्वर्वाचीनेषु च वाङ्मयेषु सूर्य इव प्रकाशमानाः भूत्वा विराजन्ते। अस्याऽत्यन्तं सुन्दरं सुसम्बन्धं सूक्ष्मतमं पदार्थावद्योतनसामर्थ्यं दृष्ट्वा प्राच्याः पाश्चात्याश्च सर्वे विद्वांसो मुक्तकण्ठेन व्याकरणमिदं प्रशंसन्ति। अत्र प्रत्याहारमुद्रया वैज्ञानिकी सूत्ररचनापद्धतिः पाणिनेराचार्यस्य प्रतिभाया अलौकिकशक्तिं प्रकाशयति। यदि विश्वभाषासु नेत्रे विस्फार्य दृष्टिर्दीयेत, तदा विश्वेऽस्मिन् कस्यांचिदपि भाषायामेतादृशं व्याकरणं नोपलभ्यते, यादृशं संस्कृतवाङ्मयस्य गौरवाधायकं पञ्चाङ्गयुक्तं पाणिनीयव्याकरणं देववाण्यां विराजते।

**मुख्यसन्दर्भग्रन्था**


१. कातन्त्रव्याकरणविमर्शः, जानकीप्रसादद्विवेदः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, द्वितीयसंस्करणम्, २०१६।
२. काशिकावृत्तिः, न्यासपदमञ्जरीव्याख्योपेता, भागः, १-६- सम्पादकौ, स्वामी द्वारिकादासशास्त्री तथा आचार्यकालिकाप्रसादशुक्लः, सुधिप्रकाशनम्, २यसंस्करणम्, क्रमेण - १९८३, १९८३, १९८४, १९८४, १९८५, १९८५।
३. पस्पशाह्निकम् - टीकाकारः सम्पादकः च शशिभूषणमिश्रः, वि. एन्. पावलिकेशान्, कोलकाता, प्रथमप्रकाशः, २०१८।
४. वाक्यपदीयम्, स्वोपज्ञवृत्त्या अम्बाकर्त्तीव्याख्यया च सहितम्, भागाः, १-३- सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, द्वितीयसंस्करणम्, वाराणसी,१९८८; १९८०; १९९१, १९९७, २०००।
५. वाचस्पत्यम् (भागाः, १-६) - तारानाथतर्कवाचस्पतिभट्टाचार्यः, चौखम्बा संस्कृत सिरीज् अफिस्,वाराणसी, १९६२।
६. व्याकरण दर्शनेर इतिहास -गुरुपदहालदारः, संस्कृतवुक्डिपो, कोलकाता, पुनर्मुद्रणम्, जानुयारी, २००६।
७. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमातत्त्वबोधिनीटीकाद्वयोपेता, भा.,१-४) - संपादकौ, गिरिधरशर्मा, परमेश्वरानन्दशर्मा, मो. व. दास, दिल्ली, पुनर्मुद्रणम्, २००४, २००६, २००५, २००२।
८. शब्दकल्पद्रुमः (भा.,१-५)- राजा राधाकान्तदेवः, नाग पब्लिशर्स, दिल्ली, पुनर्मुद्रणम्, १९८८।
९. शब्दशास्त्रेर इतिहास - कालीजीवनदेवशर्मा(चक्रवर्त्ती),रामकृष्णमिशन- इनस्टिटिउट्-अफ् कालचार्, गोलपार्क्, कोलकाता, प्रथमप्रकाशनम्,१९९५।
१०. संस्कृत व्याकरणशास्त्र का इतिहास, १-३ भाग - ब्रह्मदत्तजी जिज्ञासु, रामलाल कपुर ट्रष्ट,सोनिपत्, हरियाणा, संवत्, २०५१, २०३०, २०३०।
११. संस्कृतव्याकरणशास्त्रेतिहासविमर्शः- डाँ. अशोकगौडशास्त्री, भारतीयविद्यासंस्थानम्, वाराणसी, प्रथमसंस्करणम्, विक्रमसंवत्, २०५५।